परिप्रेक्ष्य

# रामायणे योगमयं रामराज्यम्

महावीर अग्रवालः*

पतंजलि विश्वविद्यालयः, हरिद्वार, उत्तराखण्ड, भारत

*संवाद लेखक - प्रो. महावीर अग्रवालः, प्रति-कुलपतिः, पतंजलि विश्वविद्यालयः, हरिद्वार-249405, उत्तराखण्ड, भारत
Email - provc@uop.edu.in

## सारांश

भारते निवसन्तः सर्वेऽपि जना रामराज्यं कामयन्ते। ऋषयः, विद्वांसः, योगिनः, राजनेतारश्चापि अस्माकं देशे रामराज्यं स्थापितं भवेदित्येव प्रार्थयन्ते। युगाद् युगान्तराणि व्यतीतानि, भारतं सुदीर्घकालपर्यन्तं पारतन्त्र्यनिगडनिगडितमासीत्, तदापि रामराज्यस्यैव प्रार्थना क्रियते स्म। स्वतन्त्र देशेऽपि वयं तदेव कामयामहे। किमासीद् रामे राज्यं प्रशासति? अस्यैव प्रश्नस्योत्तरं शोधपत्रे समासेन प्रस्तूयते। श्रीरामकालीनाः जनाः योगं सेवमानाः, विगत कल्मषाः, धर्मधुरीणः, सदाचारसंपन्नाः, वेदवेदाङ्गाध्ययनरताः, हविष्मन्तः, परोपकारिणः, त्रिविधदुःखरहिताः, प्रेम्णा निवसन्तः सुखमयं जीवनं धारयन्ति स्म। दशरथनन्दनाः सर्वेऽपि श्रीरामादयः भ्रातरः, वेदपथगामिन आसन्। सर्वेषां योगे, यमनियमानां परिपालने परमा निष्ठा बभूव। कर्म-ज्ञान-भक्ति योगानां संगमे स्नात्वा समेषां जीवनं परमपवित्रमासीत्। महर्षिपतञ्जलिना योगदर्शने, उपनिषत्सु, श्रीमद्भगवद्गीतायां च योगमाश्रित्य यद्-यद् उदीरितं, तत् सर्वं रामराज्ये द्रष्टुं शक्यते। इदानीं तस्यैव राज्यस्य प्रार्थनां वयं कुर्मः।

## Abstract

Every person living in India desires Ramrajya. Ramrajya established in India has remained a prolonged prayer of scholars, yogis, and even politicians. Ages passed India remained a colony for decades and people wished for Ramrajya which remains the very same after we are breathing the air of freedom in our independent nation. What was Ramrajya? As an answer to this question, a research journal is being concisely presented. Rama periodic people were all adopters and followers of yoga, free from all impurities, deeply rooted in their dharma, were enhanced with the values of virtuousness, performers of yajna, were philanthropic, and led a happy life living with love, compassion, and sympathy. All the four sons of Dasaratha leading Rama were followers of the Vedic path. All had developed great devotion towards following yoga, the Yamas and the Nimayas. Their lives had turned the purest taking dives into the confluence of action, knowledge, and devotion. Whatever contexts we stumble across referred to yoga in Patanjali's yoga darshanam, Upanishads and Srimad Bhagavad Gita could all be seen shimmering in Ramrajya. We wish for that Ramrajya today from the core of our hearts.

## कूजन्तं राम रामेति मधुरं मधुराक्षरम्।
## आरूह्य कविताशाखां वन्दे वाल्मीकि-कोकिलम्।।

सुविख्याते विपुले संस्कृतवाङ्मय आदिकवि वाल्मीकि-विरचितं रामायणमहाकाव्यं न केवलं भारतीयानां कृतेऽपि तु विश्वस्याऽनेकेषु देशेषु निवसतां जनानां कृतेऽतीव हृद्यं, रमणीयं, सरसातिसरसं, मधुरातिमधुरं, भव्य-भावोद्भावकमुत्कृष्टतमं महाकाव्यम्। किं नास्ति रामायणे? पुरूषार्थचतुष्टयस्य, धर्मस्य, राजधर्मस्य, संस्कृते: पारिवारिक-सौहार्दस्य चोपदेष्टा महाकविरसौ न कस्य वन्द्यः?

रामायणे नैके विषयाः कान्तासम्मितशैल्यां, सुहृत्सम्मितशैल्यां वा प्रतिपादिताः सन्ति। भाषाया माधुर्यौज-प्रसाद-गुणसमन्वितत्वेन, रचनाशैल्याः प्राञ्लतया, भारतीयायाः संस्कृतेर्विशदं विवरणेन, आचार-संहितायाः प्रतिपादनेन, मार्मिक भावाऽभिव्यञ्जनेन, महाकाव्यमिदं भूयो-भूयोऽभिनद्यते, संस्तूयते, प्रशस्यते च मनीषिभिः।

रामायणचम्पूकाव्ये स्वनामधन्यः श्रीभोजराजः रामायण-महिमानमित्थं गायति मधुमयभणितीनां मार्गदर्शी महर्षिः। आदिकविप्रणीतस्य रामायणस्य एकैकं पद्यम् एकैकमक्षरम् च मानवानामखिलकल्मषनाशकं वरीवर्ति। यथोक्तमेकैकमक्षरं पुंसां महापातकनाशनम्। सहस्रेभ्यो वर्षेभ्यो भारतीया जना रामायणे वर्णितं रामराज्यं कामयन्ते। एकोनविंशशताब्द्यां विश्वविश्रुतः राष्ट्रपिता महात्मा गांधी अनुक्षणं रामराज्यमेव कामयाञ्चक्रे। तस्य महामानवस्य सर्वासु प्रार्थनासु रामराज्यस्य कामनैव प्रमुखा अभूत्। यतो हि भगवतः श्रीरामभद्रस्य जीवनमाचरणं वाऽनुपममलौकिकञ्चासीत्। रामायणस्य बालकाण्डेऽयोध्या-काण्डे चन्द्रमसः चन्द्रिकेव भगवतः पावनं दिव्यं चरित्रं पाठं-पाठं, श्रावं-श्रावं वा वयं कमप्यनिर्वचनीयं हर्षप्रकर्षमनुभवामः। मर्यादा-पुरूषोत्तमो भगवान्श्रीरामचन्द्रो विग्रहवान् धर्म एवासीत्। धर्मज्ञः, धर्मिष्ठः, धर्मभृतां वरः, धर्मवृक्षः इत्यादिभिः विशेषणैर्विभूषिताः भगवन्तः स्वयमेव निगदन्ति-

धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।
धर्मसंश्रितमप्येतत् पितुर्वचनमुत्तमम्।। (1)

श्री रामभद्रस्येदं महनीयं चरित्रं विलोक्य महाकविः भवभूतिः श्रीरामचन्द्रमुखेन प्रोवाच-

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।। (2)

वैदिका ऋषयो राष्ट्रकल्याणाय वेद-मन्त्रेषु यत् प्रार्थयामासुः तद् रामे राज्यं प्रशासति प्रत्यक्षमेव बभूव। यथा वैदिकी प्रार्थना -

ओम् आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम्-
आ राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम्-
दोग्ध्री धेनुर्वोढाऽनड्वान् आशु सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः -
सभेयो युवास्य यजमानस्य वीरो जायतां-
निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां
योगक्षेमो नः कल्पताम्।। (3)

प्रार्थनेयं रामराज्ये पूर्णतां प्राप्तवती, यथा निगदितं वाल्मीकिना -

काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः।
हृष्टपुष्टजनाकीर्णपुरं जनपदास्तथा।। (4)

स्वर्गसमायाः आनन्द-परिपूर्णायाः अयोध्यायाः चारू चित्रणं राम-राज्यस्य स्वरूपं प्रकटयति-

नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा।
नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति।। (5)

स्व-स्वकर्मसु अभिरतानां वर्णमर्यादापरिपालकानां आचार-निष्ठानां चतुर्णामपि वर्णानां स्वरूपं श्रवणयोग्यं वर्तते। यथा-

ब्राह्मणैः क्षत्रियैर्वैश्यै स्वकर्म-निरतैः सदा।
जितेन्द्रियैर्महोत्साहैर्वृतामार्यैः सहस्रशः।। (6)

तस्याम् अयोध्यायां न कोऽपि कामातुरः, न चापि कदर्यो नृशंसो वा जनः द्रष्टुं शक्यते स्म। सर्वे विद्वांसः आस्तिकाः सर्वात्मना परमेश्वरं ध्यायन्तः मानवजीवनं धन्यमकार्षुः यथोक्तम्-

कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित्।
द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः।।

भगवान् श्रीरामचन्द्रः तत्रत्यानां विप्राणां, क्षत्रियाणां, वैश्यानाञ्च गौरवमित्थं प्रतिपादयति-

क्षत्रं ब्रह्ममुखं चासीद् वैश्याः क्षत्रमनुव्रताः।
शूद्राः स्वकर्मनिरतांस्त्रीन् वर्णानुपचारिणः।। (7)

पूजिताः संविभक्ताश्च मृदवः सत्यवादिनः।
ब्राह्मणा मे स्वकर्मस्था मा ममान्तरमाविशः।।
ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः लोभविवर्जिताः।
स्वकर्मसु प्रवर्त्तन्ते तुष्टाः स्वैरेव कर्मभिः।। (8)

रघुकुलोत्पन्नानां महीपतीनामासीन्महनीया जीवनपद्धतिर्न केवलं राजानोऽपि तु प्रजा अपि आश्रम-जीवन-पद्धतिं परिपालयन्ति स्म। कविकुलगुरुः कालिदासः रघुवंशमहाकाव्ये रघुकुलस्य महिमानमित्थं वर्णयति। तद्यथा,

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।। (9)

भगवान् श्री रामचन्द्रः अनुजं भरतं कुशलक्षेम-व्याजेन यदुपदिदेश तत् सर्वम् अयोध्यायां पदे-पदे जने-जने दरीदृश्यते स्म। तद्यथा,

स कच्चिद् ब्राह्मणो विद्वान्धर्मनित्यो महाद्युतिः।
इक्ष्वाकूणामुपाध्यायो यथावत् तात पूज्यते।।
कच्चिद्विनयसम्पन्नः कुलपुत्रो बहुश्रुतः।
अनसुयुरनुद्रष्टा सत्कृतस्ते पुरोहितः।।
यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि राघव।
तानि पुत्रपशून् घ्नन्ति प्रीत्यर्थमनुशासतः।।
कच्चिदर्थेन वा धर्ममर्थं धर्मेण वा पुनः।
उभौ वा प्रीतिलोभेन कामेन न विबाधसे।। (10)

धर्मानुगः प्रजावत्सलः सागर-वेलापर्यन्ताया भुवः भर्त्ता, सूर्य इव तेजस्वी, शशिरिव आह्लादकः श्रीरामः। तस्य च राज्ञः विविध-गुणविभूषिता, पतिव्रतानां वन्दनीया, अग्निरिव परमपवित्रा भार्या सीता, अपि च त्रिलोके विश्रुता रमणीया राजधानी अयोध्या। तत्रत्याः जना सत्यपथगामिनः चरित्रवन्तः देशभक्तिपरिप्लाविताः, विद्यानुरागिणः प्रभुभक्तिपरायणाश्च आसन्। रामायणस्य बालकाण्डे श्रीरामभद्रस्य गुणाः इत्थं वर्णिताः महाकविना-

इक्ष्वाकुवंशप्रभवो रामो नाम जनै श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी।।

धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः।
यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान्।।
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदांगतत्वज्ञो धनुर्वेदे च निष्ठितः।।
स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव।।
विष्णुना सदृशो वीर्ये सोमवत् प्रियदर्शनः।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः।। (11)

तस्य स्वनामधन्यस्य विश्ववन्दनीयस्य श्रीरामचन्द्रस्य राज्ये बालाः स्थविराः वृद्धा धनिनो निर्धना विद्वांसोऽविद्वांसः सर्वेऽपि त्रिविधदुखविरहिताः सानन्दं निवसन्ति स्मः। अयोध्यायां धर्मस्य, सत्यस्य, मानवतायाः करुणाया अहिंसायाः प्रेम्णश्च साम्राज्यमासीत्। श्रृण्वन्तु आदिकवेर्हृदयानुरञ्जिनीं वाचम्-

न पर्यदेवन् विधवा न च व्यालकृतं भयम्।
न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति।।
नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा।
नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति।। (12)

सर्वं मुदितमेवासीत्सर्वो धर्मपरोऽभवत्।
राममेवानुपश्यन्तो नाभ्यहिंसन्परस्परम्।।
नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः।
काले वर्षे च पर्जन्यः सुधास्पर्शश्च मारूतः।।
आसन् प्रजा धर्मरता रामे शासति नानृताः।
सर्वे लक्षण-सम्पन्नाः सर्वे धर्मपरायणाः।।

लोकोत्तरमासीत् श्रीरामचन्द्रस्य जीवनम्। सुखे वा दुखे वा जये वा पराजये वा, लाभे वा हानौ वा न कदापि तस्य वदनाम्भोजे विकारो दृश्यते स्म। पित्रा राज्याभिषेकाय आहूते सति तत्क्षणमेव च वनं गन्तुमादिष्टे सति न तस्य मनागपि विकारोऽभवत्। कौसल्यानन्दवर्धनेन भगवता श्रीरामचन्द्रेन स्वकीया जननी, मातृभूमिश्च सर्वदा स्वर्गादपि गरीयसी मते।

महनीयेऽस्मिन्महाकाव्ये वन्दनीयानां समेषामपि श्रीरामपक्षीयपात्राणां जीवने कर्म-भक्ति-ज्ञानयोगानां स्रोतस्विनी सततं प्रवहमाना आनन्दयति सहृदयानां चेतांसि। कर्मयोगस्य चरमोत्कर्षो भगवतः श्रीरामस्य, सुमित्रानन्दनस्य लक्ष्मणस्य, धर्मधुरन्धरस्य, सेवाव्रतधारिणोऽतुलबलधाम्नो हनुमतो जीवने दर्शं दर्शं प्रसीदामो वयम्। दिने वा रात्रौ वा, गहनकान्तारे, स्वर्णमय्यां लंकायां वा प्रमादरहितेन पवनपुत्रेण यदाचरितं कस्याविदितं तद्? अनुजेन लक्ष्मणेन चतुर्दशवर्षपर्यन्तं कर्मयोगिनो यद् विस्मयकरं स्वरूपं प्रदर्शितं तत्सर्वथा विस्मयकरं विद्यत एव। भक्तियोग-गंगायां नितरां मज्जनशीलस्य भरतस्य भक्तिरनुपमैव।
नन्दिग्रामे निविसद्भिर्भ्रातुश्चरणपादुकां सिंहासने संस्थाप्य नक्तन्दिनं पूजयद्भिरेभिः यथा सेविता प्रजा तथा विश्वैतिह्ये न कुत्रापि द्रष्टुं शक्यते। भर्त्तारमेव जीवन-सर्वस्वं मन्यमानाया भगवत्याः सीतायाः परमपावनं चरित्रं स्मृत्वैव निखिलानि दुरितानि नश्यन्ति।

ज्ञानयोगस्य तु का कथा। रामायणे श्रीराम-भरत-लक्ष्मण-शत्रुघ्न-हनुमानादयः सर्वे एव वेदविद्या पारङ्गताः, विविधविद्याविभूषिताः, परमे ब्रह्मणि निमग्नाः, समाधिमाकलय्य ध्यानरताः, यमानां-नियमानां पालयितारः, अष्टांगयोगं व्यवहारे प्रतिक्षणं धारयन्तः, योगस्य दिव्यं-भव्यं स्वरूपं जनानां पुरतः स्थापयन्ति।

वयमिदानीमपि तदेव रामराज्यं स्मरामः अहर्निशं च करुणासागरं, त्रैलोक्यरक्षकं, आनन्दप्रदातारं परमेश्वरं प्रार्थयामहे-प्रभो! भारतेऽस्मिन् रामराज्यं सुप्रतिष्ठितं भवेत्। समायाते रामराज्ये सर्वेषामपि दुखानामवसानं भविष्यति नास्त्यत्र मनागपि सन्देहावसरः।

## संदर्भ

1.वा.रा. अयोध्याकाण्ड 21-41
2.उत्तरामचरितम् 1-12
3.यजुर्वेद 22/22
4.वा.रा. उत्तरकाण्ड 99/13
5.वा.रा. उत्तर काण्ड 19/14
6.वा.रा. अयोध्या का. 100/4
7.वा.रा. बालकाण्ड 6/119
8.वा.रा. युद्धकाण्ड 128/104
9.रघुंश महाकाव्यम् 1/7, 8
10.वा.रा. अयोध्याकाण्ड 100/9,11,59,62
11.वा.रा. बालकाण्ड 1/8,12,14,17,18
12.वा.रा. उत्तरकाण्ड 99/14